# पापविमोचन स्तोत्र

– श्री विजयींद्रतीर्थरु

सुकृतं तिलमात्रतुल्यमीश क्रियते नैव मयैकवत्सरेऽपि ।
अपि तु क्रियते तु दोषपूगः प्रतियामं सकलेंद्रियैर्मुकुंद ॥ १॥
न शिरश्चलतीश मे कदाऽपि श्रुतिजानंदभरेण सद्गुणानाम् ।
अपि तु प्रभुबंधुदुर्गुणानां श्रवणार्थं चलितं भवत्यशंकम् ॥२॥
श्रवणे श्रवणाय सत्कथाया न यतेते तव पुण्यकीर्तनस्य ।
अपि तु व्यभिचारलोकवार्ताश्रवणायैव महादरं प्रयातः ॥३॥
न ममाक्षियुगं प्रवर्तते श्रीभगवच्चास्त्रकुलावलोकनाय ।
अपि तु ध्रुवपाल नर्तकीनां गणिकानां परिनर्तनादिदृष्ट्यै ॥४॥
न हि नासिकया कदापि विष्णोः पदपद्मार्पितपुष्पगंधबुद्धिः ।
कमलेश भवामि किंतु विष्णोश्चरणानर्पितपुष्पगंधबुद्धिः ॥५॥
नृहरेऽच्युत माधवेश दामोदर कृष्णेति मुखांस्तवाभिधौघान् ।
न हि कीर्तयतीह मे कुजिह्वाऽपि तु दुर्लिंगभगांकितान् कुशब्दान्॥६॥
तव गेहवरावलेपनादिं न करौ मे कुरुतः कदाऽपि भक्त्या ।
अपि तूरुगुणार्णदुष्टवस्तुग्रहणायैव मुकुंदा किं तु कुर्मः ॥ ७ ॥
उदरं मम धिक् शठस्य विष्ण्वर्पितपूतान्नविवर्जितं नितांतम् ।
यदपूततरासमर्पणीयाधमवृंताकपलांडुपूर्वभाजः ॥ ८॥
खलजारवधूगृहाणि नित्यं चरणाभ्यामनुयाम्यहं खराभ्याम् ।
न तु माधव तावकालयांश्च प्रतियामीश महत्तमाग्रहोऽहम् ॥ ९॥

मन एव हरेऽखिलेंद्रियाणां वरमित्थं प्रमितं श्रुतिस्मृतिभ्याम्  ।
सुमनोजयिनोऽखिलेंद्रियाणां जय एवेति जनानुभूतिरस्ति  ॥ १०॥
मनसाऽच्युत कृष्ण तादृशेनाप्यनुचिंत्यैव भवंतमात्मभक्तान्  ।
भववारिनिधे सुतारयंतं भववार्धिं न हि तर्तुमस्ति यत्नः  ॥ ११॥
मम पापचयस्य वासुदेवांतकलोकस्थितिरेव चेत् फलं तु  ।
न सुखी सदृशोऽस्ति मे त्रिलोक्यां फलभावेन महत्तमोऽस्ति क्लृप्तम्
॥१२॥
न सुखानुभवाय पापकर्माण्यहमीशानुदिनं तनोमि किंतु  ।
अघनाशियशः परीक्षाणार्थं तव नाम्नामनुतापसिद्धये वा ॥१३॥
न सुखं विषयाद्धि किंतु प्रसुखव्याप्तिबलात् परीक्षयाऽपि ।
तव मंगलनामकीर्तनोत्थैः सुकृतैः शमं ममेति कोऽपराधः ॥१४ ॥
निजवासरुषा प्रदातुमार्तिं ह्यधिकां पापनियामकासुरेभ्यः  ।
अशुभान्यपि कारयन् मया त्वं रमसे सर्वनियामकेति भाति  ॥ १५॥
यदि कृष्ण कदाचनापि पुण्यं घटते पापमयस्य मेऽपि तत्तु  ।
प्रबलाघचयैर्विहन्यते वा दुरितध्वंसकृतार्थमीश वा स्यात् ॥ १६॥
तदिहोभयथ विपुण्यमूर्तेः सुकृतं नो घटते मनागपीश  ।
वद मे पुरतस्त्वतीव भीरोर्भगवन् कालभयापहर्त्युपायम्  ॥ १७॥
अतुलं वरवैष्णवं सुजन्माच्युत दत्तं कृपया त्वयाऽहमाप्य  ।
क्षणजीव्यपि कल्पगत्वबुद्ध्या पशुचंडालवदेव संचरामि  ॥ १८॥
न तदस्ति शरीरिणां शताब्दायुषि शास्त्रप्रमितेऽपि किंचिदेव  ।
भगवन् खलु सुप्तरात्रिकालो जलहोमस्य समानतामुपैति ॥ १९॥

द्विदशाब्दयुगं दिवाऽपि पूर्वोत्तरमीश स्थविरत्वशैशवाभ्याम् ।
समयं प्रणयामि सर्वरोगैर्बहुलीलाभिरपि प्रमूढबुद्ध्या ॥ २०॥
परिशोषित ईश मध्यकालः सुकृते भारतभूतळेऽवसिष्ठः ।
यदिहास सदैव पापचित्ते मयि पश्चांत्यजयोश्च कोऽपराधः।२१॥
इह भारतभूतळेऽतिपुण्ये द्रविणस्त्रीसुतपूर्वकेषु मायाम् ।
अलमेकदिनं विमुच्य वा मे तव पादाब्जरतिं प्रदेहि देहि॥ २२॥
रमयाऽप्यगणेयवस्तुजातं द्विविधं प्राहुरमंदबुद्धिभाजः ।
तव सद्गुणजातमेकमन्यन्मम दुर्वारदुरंतपापजातम् ॥ २३॥
अतिसौख्यकराण्यलं परत्रेह तु किंचित् श्रमसाध्यसाधनानि ।
श्रमभीरुरहं त्यजन् परत्रामित सौख्यानुभवी कथं भवेयम् ॥२४॥
भुवि यद्यपि पापिनो वसंति श्रमभाजः पुरुषास्तथाऽपि कोऽपि ।
मम पापसमानपापकर्ता पुरुषो नास्ति हि नास्ति नास्ति नास्ति ॥२५॥
नतयो न कृताः प्रदक्षिणाश्चस्तुतयोऽपि द्रुतकमितार्थदात्र्यः ।
न गुरुः परिसेवितः सुभक्त्या शुभशास्त्रश्रवणं कथं ततः स्यात्॥२६॥
वचनैर्बहुभिर्मुकुंद किं ते श्रुणु मे बीजवचे वदामि तुभ्यम्।
भुवनत्रयसंस्थितानि यानीश्वर पापानि वसंति मय्ययोग्ये ॥ २७॥
प्रकृतैस्तदघैश्च कृष्ण मुक्तिर्न भवेत् कैरपि ते दयां विनाऽद्य ।
करुणां कुरु मय्यतो मुरारे नतयस्ते कमलेश संत्वनंताः ॥ २८॥
विजयींद्रयतीश्वरो व्यतानीत् स्तुतिमेनांदुरितापहां मुरारेः ।
परमादरतः सदा पठेद्यो निखिलैः पापचयैर्भवे स मुक्तः ॥ २९॥
॥ इति श्रीमद्विजयींद्रयतिकृत पापमोचन (दुरितापहर) स्तोत्रम्॥

संग्रह – नरहरिसुमध्व